रागरागिण्य इति यावत्। यथा,—
"औड़वः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाड़वः।
सम्पूर्णा सप्तभिः प्रोक्ता रागजातिस्त्रिधा मता"॥
इति सङ्गीतरत्नाकरः॥ अपि च। सम्पूर्णस्वराः
ष ऋ ग म प ध नि॥ षाड़वस्वराः निषादो-
ज्झिताः ष ऋ ग म प ध॥ औड़वस्वराः ऋ-प-
वर्जिताः ष ग म ध नि॥ सम्पूर्णरागाः सप्तभिः
स्वरैर्यथा। नटवसन्तादयः। षाड़वरागाः षड्भिः
स्वरैर्यथा। सैरिन्ध्रीप्रभृतयः। औड़वरागाः
पञ्चभिः स्वरैर्यथा मल्लारादयः। इति सङ्गीत-
दामोदरः॥ (तथा च सङ्गीतरत्नाकरे स्वराध्याये
जातिप्रकरणे। ५३—५४॥
"वान्ति यान्त्युड़वोऽत्रेति व्योमोक्तमुड़वं बुधैः।
पञ्चमं तच्च भूतेषु पञ्चसंख्या तदुद्भवा॥
औड़वी सास्ति येषाञ्च स्वरास्ते त्वौड़वा मताः।
ते संजाता यत्र गीते तदौड़वितमुच्यते॥
तत्सम्बन्धादौड़वञ्च पञ्चस्वरमिदं विदुः"।
"क्रमादल्पाल्पतरते षाडवौडवकारिणोः"॥)

औडुम्बरं, क्ली, कुष्ठरोगविशेषः। इति मेदिनी॥
तस्य लक्षणम्।
"खरदाहरागकण्डूभिः परीतं रोमपिञ्जरम्।
उडुम्बरफलाभासं कुष्ठमौडुम्बरं वदेत्"॥
इति निदानम्॥ ताम्रम्। इति जटाधरः॥
ताम्रपात्रादौ त्रि॥ (उडुम्बरस्य विकारः। उडुम्बर
+अण्। उडुम्बरपात्रम्। यज्ञाङ्गस्तद्विकारः।
यथाह देवलः।
"गृहीत्वौडुम्बरं पात्रं वारिपूर्णमुदङ्मुखः"॥)

औडुम्बरः, पुं, चतुर्द्दशयमान्तर्गतयमविशेषः। इति
मेदिनी॥ मुनिविशेषः। यथा,—
"वैखानसा बालिखिल्यौडुम्बराः फेनपा वने।
न्यासे कुटीचकः पूर्व्वं बह्वोदो हंसनिष्क्रियौ"॥
इति श्रीभागवते ३। १२। ४३। "औडुम्बराः
प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृतैः
फलादिभिर्जीवन्तः"। इति तट्टीकायां स्वामी॥

औत्कर्ष्यं, क्ली, (उत्कर्षस्य भावः। उत्कर्ष+ष्यञ्।)
उत्कर्षता॥

औत्तानपादिः, पुं, (उत्तानपादस्यापत्यम् पुमान्।
उत्तानपाद+इञ्।) ध्रुवः। इत्यमरः॥ स तु
उत्तानपादराजपुत्त्रः। स्वायम्भुवमनुपौत्त्रः।
(यथा भागवते। ४। १०। ३०।
"औत्तानपादे भगवांस्तव शार्ङ्गधन्वा
देवः क्षिणोत्ववनतार्त्तिहरो विपक्षान्॥
उत्तानपादात् सुरुच्यां जात उत्तमः। इति महा-
भारतम्॥) ग्रहाणामुपरिस्थितनिश्चलतारा च॥

औत्सर्गिकः, त्रि, (सामान्यविधिरुत्सर्गस्तस्य भावः।
उत्सर्ग+ठञ्।) सामान्यत्वम्। इति स्मार्त्ताः॥

औत्सुक्यं, क्ली, (उत्सुकस्य भावः। उत्सुक+ष्यञ्।)
उत्कण्ठा। इति हेमचन्द्रः॥ (यथा रत्नावली।
"औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना
ह्रिया"॥ "रथचरणसमाह्वस्तावदौत्सुक्यनुन्ना"।
इति माघे ११। २६। तथा मेघदूते पूर्व्वमेघे॥५॥
"इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे"।
व्यभिचारिभावभेदः।
यथा साहित्यदर्पणे ३। १३७। "औत्सुक्योन्माद-
शङ्काः स्मृतिमतिसहिता व्याधिसन्त्रासलज्जाः"॥
तल्लक्षणं तत्रैव ३। १५६।
"इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता।
चित्ततापत्वरास्वेददीर्घनिश्वसितादिकृत्"॥
उदाहरणं यथा तत्रैव।
"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढ़ाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते"॥
इच्छा। यथा, तत्त्वकौमुद्याम्।
"औत्सुक्यमिच्छा सा च इष्यमाणप्राप्तौ निवर्त्तते
इष्यमाणस्य स्वार्थं इष्टलक्षणत्वात् फलस्य"॥)

औदनिकः, त्रि, (ओदनं शिल्पमस्य। ओदन+ठञ्।)
सूपकारः। इत्यमरः॥

औदरिकः, त्रि, (उदरे प्रसितः। उदर+ठक्।)
विजिगीषाविवर्ज्जितः। उदरमात्रपूरकः। पेटुक
इति भाषा। तत्पर्य्यायः। आद्यूनः २। इत्यमरः॥
(यथा किराते। ११। ५ श्लोकस्य टीकायां
मल्लिनाथः। "अतएवाद्यून औदरिकः। आद्यूनः
स्यादौदरिके विदिगीषाविवर्ज्जिते। इत्यमरः"॥)
"विजिगीषाव्यवहारः कश्चित् प्रकर्षो वा आल-
स्यात् तेन विहीनो यः केवलमुदराधीनः"। इति
भरतः॥ "स्वोदरपूरणाशक्तिनिमित्तकनिन्दात्या-
गेच्छा विजिगीषा तया रहितः"।
इति रमानाथः॥

औदश्वितं, क्ली, (उदश्वित्+"उदश्वितोऽन्यतर-
स्याम्"। ४। २। १९। इति पक्षे अण्।) अर्द्ध-
जलयुक्तघोलं। इति हेमचन्द्रः॥ (उदश्विच्छब्दे-
ऽस्य विशेषो ज्ञातव्यः॥)

औदश्वित्कं, क्ली, (उदश्विति संस्कृतम्। "उदश्विती-
ऽन्यतरस्याम् ४। २। १९ इति ठक्। "इसुसुक्ता-
न्तात् कः"। ७। ३। ५१। इति ठस्य कः।) अर्द्ध-
जलमिश्रितघोलम्। इति हेमचन्द्रः॥

औदार्य्यं, क्ली, (उदारस्य भावः। उदार+ष्यञ्।)
उदारता। इति हेमचन्द्रः॥ (वाग्गुणभेदः। यथा
किराते १। ३॥ "स सौष्ठवौदार्य्यविशेषशा-
लिनीम्" इति "औदार्य्यं अर्थसम्पत्तिः" इति
मल्लिनाथः॥ सात्त्विको नायकगुणभेदः। यथा
साहित्यदर्पणे ३। ५८।
"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी।
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः"॥
तल्लक्षणं यथा तत्रैव ३। ६३।
"दानं सप्रियभाषणमौदार्य्यं शत्रुमित्रयोः समता"॥
नायिकालङ्कारभेदः। यथा, तत्रैव ३। ९४।
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः"॥
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता।
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः"॥
तल्लक्षणं यथा तत्रैव ३। १०३। "औदार्य्यं विनयः
सदा"॥ अस्य उदाहरणं यथा तत्रैव।
"न ब्रूते परुषां गिरं वितनुते न भ्रूयुगं भङ्गुरं
नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि
कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः
सख्या वक्त्रमभिप्रयच्छति परं पर्य्यश्रुणी लोचने"॥
मनसो वृत्तिभेदः। यथा पञ्चदशी। १५। ३।
"शान्ता घोरास्तथा मूढ़ा मनसो वृत्तयस्त्रिधा।
वैराग्यं क्षान्तिरौदार्य्यमित्याद्या घोरवृत्तयः"॥)

औदास्यं क्ली, (उदास+ष्यञ्।) उदासस्य भावः।
वैराग्यम्। अनुरागादिशून्यता। यथा।
"औदास्यसंविदवलम्बितशून्यमुद्रा-
मस्मिन् दृशोः पतिततामवलोक्य भैम्याः"।
इत्यादि नैषधम्॥ "क्षौणीदिलिखनहेतोर्वयमपि
कुब्जाः किमौदास्यम्"। इति पद्यावली॥

औद्दालकं, क्ली, (उद्दालेन कीटेन सञ्चितम्। उद्दाल-
+अण्+संज्ञायां कन्।) वल्मीककारिकीट-
निर्म्मितमधु।
तस्य गुणाः। कषायत्वम्। उष्णत्वम्। कटुत्वम्।
कुष्ठविषरोगनाशित्वञ्च। इति राजवल्लभः॥
(अथौद्दालकस्य लक्षणं गुणाश्च यथा।
"प्रायो वल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः।
कुर्व्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु॥
औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम्।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तकृत्"॥
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥
तीर्थविशेषः। यदुक्तं महाभारते ३। ८४। १५९।
"औद्दालकं महाराज तीर्थं मुनिनिषेवितम्।
तत्राभिषेकं कृत्वा वै सर्व्वपापैः प्रमुच्यते"॥

औद्धत्यं, क्ली, (उद्धत+ष्यञ्।) उद्धतस्य भावः।
यथा। "असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता।
भ्रूभङ्गदोषसंघोषरक्ताद्यविवेकतादिकृत्"॥ इति
साहित्यदर्पणे ३ परिच्छेदः॥

औद्भिज्जं, क्ली, (उद्भिद्+जन+ड+स्वार्थे अण्।)
पांशवलवणं। इति राजनिर्घण्टः॥

औद्भिदं, क्ली, (उद्भिद+स्वार्थेऽण्।) साम्भरि-
लवणम्। अस्य गुणाः। (यथा सुश्रुते। सूत्रस्थाने
४६ अः॥
"लघु तीक्ष्णोष्णमुत्क्लेदि सूक्ष्मं वातानुलोमनम्।
सुतिक्तं कटुसंक्षारं विद्याल्लवणमौद्भिदम्"॥)
तीक्ष्णत्वम्। उत्क्लेदकारित्वम्। क्षारयुक्तत्वम्।
कटुत्वम्। तिक्तत्वम्। कोष्ठबद्धतानाहशूलनाशि-
त्वञ्च। इति राजवल्लभः॥ (अस्य पर्य्यायो गुणाश्च
यथा—
"औद्भिदं पांशुलवणं यज्जातं भूमितः स्वयं।
क्षारं गुरु कटु स्निग्धं शीतलं वातनाशनम्"॥
इति भावप्रकाशस्य पूर्व्वखण्डे। १ भागे॥
"सतिक्तकटुकक्षारं तीक्ष्णमुत्क्लेदि चौद्भिदम्"।
इति वाभटे सूत्रस्थाने। ६ अ॥)
उद्भिदो जातं जलम्। तस्य गुणाः। मधुरत्वम्।
पित्तशमनत्वम्। अविदाहित्वम्। इति राज-
वल्लभः॥
("औद्भिदं पित्तशमनं मधुरं न विदाहि च"॥
इति वैद्यकचक्रपाणिकृतद्रव्यगुणे पानीयवर्गे॥